
हर हर शंकर ॐ जय जय शंकर

श्री-वेदव्यासाय नमः

## श्रीमद्-आद्य-शंकर-भगवत्पाद-परंपरागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-कांची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शंकराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ श्रीमत्-शंकरभगवत्पादाचार्य-पूजा-पद्धतिः ॥

**५१२८ पराभव-मेषः ४–८ / शांकर-संवत्सरः २५३५**

(17.04–21.04.2026)

Shri Shankara Bhagavatpada incarnated 2534 years ago today, on Vaishakha Shukla Panchami (Panchami after Mesha Amavasya) of the Kali 2594th year (509 BCE).

Without seeking a life for Himself, He took sannyasa at the tender age of 8 and lived only until age 32. Within this time, He composed texts explaining Advaita as the philosophy of the Upanishads and Gita for the intellectually inclined. To help the common man relate to God, He composed many stotras and advocated equally worshipping all forms of God. He travelled across Bharata Desha on foot to propagate the Vaidika Sanatana Dharma.

It is because of the birth of Bhagavatpada that we continue to celebrate

Shivaratri, Rama Navami, Gokulashtami etc. Otherwise the unorthodox practices prevalent at His time would have overpowered the Sanatana traditions. Thus the significance of Shankara Jayanti is that it is the Jayanti which preserved all other Jayantis.

It is hence our duty to remember and worship Shri Shankara Bhagavatpada on this day. One may also do this starting from Prathama to Panchami or starting from Panchami. To help in this, we release this simple Puja Paddhati with Acharya's namavali and stotras on Him.

Shri Shankara Charitam Section in the fifth volume of Dheivatthin Kural/Voice of God of Shri Chandrashekharendra Sarasvati Shankaracharya Swamigal must be read by everyone on this punyadinam.

# ॥ पूजा-पद्धतिः ॥

(आचम्य)
[विघ्नेश्वरपूजां कृत्वा।]

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये॥

प्राणान् आयम्य।
(अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वंतरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जंबूद्वीपे भारतवर्षे भरतखंडे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **उत्तरायणे वसंत**-ऋतौ 2026-Apr-17 (FRI) / **5127-मेषः-4 (भृगुः) मेष-चैत्र**-मासे **कृष्ण**-पक्षे **अमावास्यायां** शुभतिथौ **भृगु**वासरयुक्तायां **रेवती**-नक्षत्र (१२:०१)युक्तायां **वैधृति**-योग (०७:२०; **विष्कंभ**-योग); **विष्कंभ**-योग; **प्रीति**-योगयुक्तायां **चतुष्पात्**-करण

(०६:५०; **नागव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्याम् **अमावास्यायां**

2026-Apr-18 (SAT) / **5127-मेषः-5 (स्थिरः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **प्रथमायां** (१४:११) शुभतिथौ **स्थिर**वासरयुक्तायाम् **अश्विनी**-नक्षत्र (०९:४१)युक्तायां **प्रीति**-योगयुक्तायां **बव**-करण (१४:११; **बालव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **प्रथमायां** (१४:११)

2026-Apr-19 (SUN) / **5127-मेषः-6 (भानुः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **द्वितीयायां** (१०:४९) शुभतिथौ **भानु**वासरयुक्तायाम् **अपभरणी**-नक्षत्र (०७:०९; **कृत्तिका**-नक्षत्र)युक्तायाम् **आयुष्मद्**-योगयुक्तायां **कौलव**-करण (१०:४९; **तैतिल**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **द्वितीयायां** (१०:४९)

2026-Apr-20 (MON) / **5127-मेषः-7 (इंदुः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **तृतीयायां** (०७:२८; **चतुर्थ्यां**) शुभतिथौ **इंदु**वासरयुक्तायां **रोहिणी**-नक्षत्रयुक्तायां **सौभाग्य**-योगयुक्तायां **गरजा**-करण (०७:२८; **वणिजा**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **तृतीयायां** (०७:२८; **चतुर्थ्यां**)

2026-Apr-21 (TUE) / **5127-मेषः-8 (भौमः) मेष-वैशाख**-मासे **शुक्ल**-पक्षे **पंचम्यां** शुभतिथौ **भौम**वासरयुक्तायां **मृगशीर्ष**-नक्षत्रयुक्तायां **शोभन**-योग (१२:२९; **अतिगंड**-योग)युक्तायां **बव**-करण (१४:४५; **बालव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **पंचम्यां**

शुभतिथौ श्रीपरमेश्वरप्रीत्यर्थम्

- उत्तराषाढा-नक्षत्रे धनूराशौ आविर्भूतानां श्रीमत्-शंकर-विजयेंद्र-सरस्वती-श्रीपादानां, शतभिषङ्-नक्षत्रे कुंभ-राशौ आविर्भूतानां श्रीमत्-सत्य-चंद्रशेखरेंद्र-सरस्वती-श्रीपादानाम् अस्माकं जगद्गुरूणां दीर्घ-आयुः-आरोग्य-सिद्ध्यर्थं,
- तैः संकल्पितानां सर्वेषां लोक-क्षेमार्थ-कार्याणां वेद-शास्त्रादि-संप्रदाय-पोषण-कार्याणां विविध-क्षेत्र-यात्रायाश्च अविघ्नतया संपूर्त्यर्थं
- कामकोटि-गुरु-परंपरायां कामकोटि-भक्त-जनानाम् अचंचल-भावशुद्ध-दृढतर-भक्ति-सिद्ध्यर्थं, परस्पर-ऐकमत्य-सिद्ध्यर्थं

- भारतीयानां महाजनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्कार्येभ्यः निवृत्त्यर्थं
- भारतीयानां संततेः सनातन-संप्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुंबानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

श्रीमत्-शंकरभगवत्पाद-प्रीत्यर्थं श्री-शंकर-जयंती-महोत्सवे यथाशक्ति-ध्यान-आवाहनादि-षोडशोपचारैः श्रीमत्-शंकर-भगवत्पादाचार्य-पूजां करिष्ये। तदंगं कलशपूजां च करिष्ये। [कलश-पूजां कृत्वा।]

## प्रधान-पूजा

श्रुति-स्मृति-पुराणानाम् आलयं करुणालयम्।
नमामि भगवत्पाद-शंकरं लोक-शंकरम्॥
श्रीमत्-शंकर-भगवत्पादाचार्यान् ध्यायामि।

अज्ञानांतर्गहन-पतितान् आत्म-विद्योपदेशैः
त्रातुं लोकान् भव-दव-शिखा-ताप-पापच्यमानान्।
मुक्त्वा मौनं वट-विटपिनो मूलतो निष्पतंती
शंभोर्मूर्तिश्चरति भुवने शंकराचार्य-रूपा॥

(नमस्ते रुद्र . . .)
यमाश्रिता गिरां देवी नंदयत्यात्म-संश्रितान्।
तमाश्रये श्रिया जुष्टं शंकरं करुणा-निधिम्॥
श्रीमत्-शंकर-भगवत्पादाचार्यान् आवाहयामि।

(या त इषुः . . .)
श्री-गुरुं भगवत्पादं शरण्यं भक्त-वत्सलम्।
शिवं शिव-करं शुद्धम् अप्रमेयं नमाम्यहम्॥

श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, आसनं समर्पयामि।

नित्यं शुद्धं निराकारं निराभासं निरंजनम्।
नित्य-बोधं चिदानंदं गुरुं ब्रह्म नमाम्यहम्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, स्वागतं व्याहरामि। पूर्ण-कुंभं समर्पयामि।

(या ते . . .)
सर्व-तंत्र-स्व-तंत्राय सदात्माद्वैत-रूपिणे।
श्रीमते शंकरार्याय वेदांत-गुरवे नमः॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, पाद्यं समर्पयामि।

(यामिषुम् . . .)
वेदांतार्थाभिधानेन सर्वानुग्रह-कारिणम्।
यति-रूप-धरं वंदे शंकरं लोक-शंकरम्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, अर्घ्यं समर्पयामि।

(शिवेन वचसा . . .)
संसाराब्धि-निषण्णाज्ञ-निकर-प्रोद्दिधीर्षया।
कृत-संहननं वंदे भगवत्पाद-शंकरम्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, आचमनीयं समर्पयामि।
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, मधुपर्कं समर्पयामि।

(अध्यवोचत् . . .)
यत्-पाद-पंकज-ध्यानात् तोटकाद्या यतीश्वराः।
बभूवुस्तादृशं वंदे शंकरं षण्मतेश्वरम्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, स्नपयामि।
(श्रीरुद्र-चमक-पुरुषसूक्त-उपनिषद्भिः स्नापयित्वा) स्नानानंतरम् आचमनीयं समर्पयामि।

(असौ यस्ताम्रः . . .)

नमः श्री-शंकराचार्य-गुरवे शंकरात्मने।
शरीरिणां शंकराय शंकर-ज्ञान-हेतवे॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, वस्त्रं समर्पयामि।

(असौ योऽवसर्पति . . .)
हर-लीलावताराय शंकराय वरौजसे।
कैवल्य-कलना-कल्प-तरवे गुरवे नमः॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, यज्ञोपवीतं समर्पयामि।

प्रचार्यं सर्व-लोकेषु संचार्यं हृद्यांबुजे।
विचार्यं सर्व-वेदांतैः आचार्यं शंकरं भजे॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, भस्मोद्धूलनं रुद्राक्ष-मालिकां च समर्पयामि।

(नमो अस्तु . . .)
याऽनुभूतिः स्वयं-ज्योतिः आदित्येशान-विग्रहा।
शंकराख्या च तं नौमि सुरेश्वर-गुरुं परम्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, दिव्य-परिमल-गंधान् धारयामि।
गंधस्योपरि हरिद्रा-कुंकुमं समर्पयामि।

आनंद-घनमद्वंद्वं निर्विकारं निरंजनम्।
भजेऽहं भगवत्पादं भजतामभय-प्रदम्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, दंडं समर्पयामि।

(प्रमुंच . . .)
तं वंदे शंकराचार्यं लोक-त्रितय-शंकरम्।
सत्-तर्क-नखरोद्दीर्ण-वावदूक-मतंगजम्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, अक्षतान् समर्पयामि।

(अवतत्य . . .)

नमामि शंकराचार्य-गुरु-पाद-सरोरुहम्।
यस्य प्रसादान्मूढोऽपि सर्व-ज्ञो भवति स्वयम्॥

श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, पुष्प-मालां समर्पयामि। पुष्पैः पूजयामि।

# ॥ श्री-शंकर-चतुर्विंशति-नामावल्या अंगपूजा ॥

१. अष्ट-वर्ष-चतुर्वेदिने नमः पादौ पूजयामि
२. द्वादशाखिल-शास्त्र-विदे नमः गुल्फौ पूजयामि
३. सर्व-लोक-ख्यात-शीलाय नमः जंघे पूजयामि
४. प्रस्थान-त्रय-भाष्य-कृते नमः जानुनी पूजयामि
५. पद्मपादादि-सच्छिष्याय नमः ऊरू पूजयामि
६. पाषंड-ध्वांत-भास्कराय नमः कटिं पूजयामि
७. अद्वैत-स्थापनाचार्याय नमः गुह्यं पूजयामि
८. द्वैतादि-द्विप-केसरिणे नमः नाभिं पूजयामि
९. व्यास-नंदित-सिद्धांताय नमः उदरं पूजयामि
१०. वाद-निर्जित-मंडनाय नमः वक्षःस्थलं पूजयामि
११. षण्मत-स्थापनाचार्याय नमः हृदयं पूजयामि
१२. षड्-गुणैश्वर्य-मंडिताय नमः कंठं पूजयामि
१३. सर्व-लोकानुग्रह-कृते नमः स्कंधौ पूजयामि
१४. सर्व-ज्ञ-त्वादि-भूषणाय नमः हस्तौ पूजयामि
१५. श्रुति-स्मृति-पुराणार्थाय नमः वक्त्रं पूजयामि
१६. श्रुत्येक-शरण-प्रियाय नमः चिबुकं पूजयामि
१७. सकृत्-स्मरण-संतुष्टाय नमः ओष्ठौ पूजयामि
१८. शरणागत-वत्सलाय नमः कपोलौ पूजयामि
१९. निर्व्याज-करुणा-मूर्तये नमः नासिकां पूजयामि
२०. निरहंभाव-गोचराय नमः नेत्रे पूजयामि
२१. संशांत-भक्त-हृत्-तापाय नमः कर्णौ पूजयामि
२२. सर्व-ज्ञान-फल-प्रदाय नमः ललाटं पूजयामि
२३. सदसद्-वस्तु-विमुखाय नमः शिरः पूजयामि
२४. सत्ता-सामान्य-विग्रहाय नमः सर्वाण्यंगानि पूजयामि

# श्रीमत्-शंकर-भगवत्पादाचार्य-अष्टोत्तर-शत-नामावलिः

श्री-शंकराचार्य-वर्याय नमः
ब्रह्म-ज्ञान-प्रदायकाय नमः
अज्ञान-तिमिरादित्याय नमः
सुज्ञानांबुधि-चंद्रमसे नमः
वर्णाश्रम-प्रतिष्ठात्रे नमः
श्री-मते नमः
मुक्ति-प्रदायकाय नमः
शिष्योपदेश-निरताय नमः
भक्ताभीष्ट-प्रदायकाय नमः
सूक्ष्म-तत्त्व-रहस्य-ज्ञाय नमः १०
कार्याकार्य-प्रबोधकाय नमः
ज्ञान-मुद्रांचित-कराय नमः
शिष्य-हृत्-ताप-हारकाय नमः
परिव्राज्याश्रमो-द्धर्त्रे नमः
सर्व-तंत्र-स्वतंत्र-धिये नमः
अद्वैत-स्थापनाचार्याय नमः
साक्षाच्छंकर-रूप-भृते नमः
षण्मत-स्थापनाचार्याय नमः
त्रयी-मार्ग-प्रकाशकाय नमः
वेद-वेदांत-तत्त्व-ज्ञाय नमः २०
दुर्वादि-मत-खंडनाय नमः
वैराग्य-निरताय नमः
शांताय नमः
संसारार्णव-तारकाय नमः
प्रसन्न-वदनांभोजाय नमः
परमार्थ-प्रकाशकाय नमः
पुराण-स्मृति-सार-ज्ञाय नमः
नित्य-तृप्ताय नमः
महते नमः
शुचये नमः ३०
नित्यानंदाय नमः
निरातंकाय नमः
निस्संगाय नमः
निर्मलात्मकाय नमः
निर्ममाय नमः
निरहंकाराय नमः
विश्व-वंद्य-पदांबुजाय नमः
सत्त्व-प्रधानाय नमः
सद्-भावाय नमः
संख्यातीत-गुणोज्ज्वलाय नमः ४०
अनघाय नमः
सार-हृदयाय नमः
सुधिये नमः
सारस्वत-प्रदाय नमः
सत्यात्मने नमः
पुण्य-शीलाय नमः
सांख्य-योग-विचक्षणाय नमः
तपोराशये नमः
महा-तेजसे नमः
गुण-त्रय-विभाग-विदे नमः ५०
कलि-घ्नाय नमः
काल-धर्म-ज्ञाय नमः
तमोगुण-निवारकाय नमः
भगवते नमः
भारती-जेत्रे नमः
शारदाह्वान-पंडिताय नमः

धर्माधर्म-विभाग-ज्ञाय नमः
लक्ष्य-भेद-प्रदर्शकाय नमः
नाद-बिंदु-कलाभिज्ञाय नमः
योगि-हृत्-पद्म-भास्कराय नमः ६०
अतींद्रिय-ज्ञान-निधये नमः
नित्यानित्य-विवेक-वते नमः
चिदानंदाय नमः
चिन्मयात्मने नमः
पर-काय-प्रवेश-कृते नमः
अमानुष-चरित्राढ्याय नमः
क्षेम-दायिने नमः
क्षमा-कराय नमः
भवाय नमः
भद्र-प्रदाय नमः ७०
भूरि-महिम्ने नमः
विश्व-रंजकाय नमः
स्व-प्रकाशाय नमः
सदाधाराय नमः
विश्व-बंधवे नमः
शुभोदयाय नमः
विशाल-कीर्तये नमः
वागीशाय नमः
सर्व-लोक-हितोत्सुकाय नमः
कैलास-यात्रा-संप्राप्त-चंद्रमौलि-
प्रपूजकाय नमः ८०
कांच्यां श्रीचक्र-राजाख्य-यंत्र-स्थापन-
दीक्षिताय नमः
श्रीचक्रात्मक-ताटंक-पोषितांबा-
मनोरथाय नमः
श्री-ब्रह्म-सूत्रोपनिषद्-भाष्यादि-ग्रंथ-
कल्पकाय नमः

चतुर्दिक्-चतुराम्नाय-प्रतिष्ठात्रे नमः
महा-मतये नमः
द्विसप्तति-मतोच्छेत्त्रे नमः
सर्व-दिग्-विजय-प्रभवे नमः
काषाय-वसनोपेताय नमः
भस्मोद्धूलित-विग्रहाय नमः
ज्ञानात्मकैक-दंडाढ्याय नमः ९०
कमंडलु-लसत्-कराय नमः
व्यास-संदर्शन-प्रीताय नमः
भगवत्पाद-संज्ञकाय नमः
सौंदर्य-लहरी-मुख्य-बहु-स्तोत्र-
विधायकाय नमः
चतुष्षष्टि-कलाभिज्ञाय नमः
ब्रह्मराक्षस-मोक्ष-दाय नमः
श्रीमन्मंडन-मिश्राख्य-स्वयंभू-जय-
सन्नुताय नमः
तोटकाचार्य-संपूज्याय नमः
पद्मपादार्चितांघ्रिकाय नमः
हस्तामलक-योगींद्र-ब्रह्म-ज्ञान-
प्रदायकाय नमः १००
सुरेश्वरादि-सच्छिष्य-संन्यासाश्रम-
दायकाय नमः
निर्व्याज-करुणा-मूर्तये नमः
जगत्-पूज्याय नमः
जगद्-गुरवे नमः
भेरी-पटह-वाद्यादि-राज-लक्षण-
लक्षिताय नमः
सकृत्-स्मरण-संतुष्टाय नमः
सर्व-ज्ञाय नमः
ज्ञान-दायकाय नमः १०८

॥ इति श्रीमत्-शंकर-भगवत्पादाचार्याष्टोत्तरशतनामावलिः संपूर्णा ॥
श्री-शंकर-भगवत्पादाचार्येभ्यो नमः, अष्टोत्तरशतनामार्चनं समर्पयामि।

# आचार्यपरंपरानामावलिः

## ॥ पूर्वाचार्याः ॥

1. श्रीमते दक्षिणामूर्तये नमः
2. श्रीमते विष्णवे नमः
3. श्रीमते ब्रह्मणे नमः
4. श्रीमते वसिष्ठाय नमः
5. श्रीमते शक्तये नमः
6. श्रीमते पराशराय नमः
7. श्रीमते व्यासाय नमः
8. श्रीमते शुकाय नमः
9. श्रीमते गौडपादाय नमः
10. श्रीमते गोविंद-भगवत्पादाय नमः
11. श्रीमते शंकर-भगवत्पादाय नमः

## ॥ भगवत्पादशिष्याः ॥

1. श्रीमते पद्मपादाचार्याय नमः
2. श्रीमते सुरेश्वराचार्याय नमः
3. श्रीमते हस्तामलकाचार्याय नमः
4. श्रीमते तोटकाचार्याय नमः
5. श्रीमते पृथिवीधवाचार्याय नमः
6. श्रीमते सर्वज्ञात्म-इंद्रसरस्वत्यै नमः
7. अन्येभ्यः भगवत्पाद-शिष्येभ्यो नमः

## ॥ कामकोटि-आचार्याः ॥

1. श्रीमते शंकर-भगवत्पादाय नमः
2. श्रीमते सुरेश्वराचार्याय नमः

3. श्रीमते सर्वज्ञात्म-इंद्रसरस्वत्यै नमः
4. श्रीमते सत्यबोध-इंद्रसरस्वत्यै नमः
5. श्रीमते ज्ञानानंद-इंद्रसरस्वत्यै नमः
6. श्रीमते शुद्धानंद-इंद्रसरस्वत्यै नमः
7. श्रीमते आनंदज्ञान-इंद्रसरस्वत्यै नमः
8. श्रीमते कैवल्यानंद-इंद्रसरस्वत्यै नमः
9. श्रीमते कृपाशंकर-इंद्रसरस्वत्यै नमः
10. श्रीमते विश्वरूप-सुरेश्वर-इंद्रसरस्वत्यै नमः
11. श्रीमते शिवानंद-चिद्घन-इंद्रसरस्वत्यै नमः
12. श्रीमते सार्वभौम-चंद्रशेखर-इंद्रसरस्वत्यै नमः
13. श्रीमते काष्ठमौन-सच्चिद्घन-इंद्रसरस्वत्यै नमः
14. श्रीमते भैरवजिद्-विद्याघन-इंद्रसरस्वत्यै नमः
15. श्रीमते गीष्पति-गंगाधर-इंद्रसरस्वत्यै नमः
16. श्रीमते उज्ज्वलशंकर-इंद्रसरस्वत्यै नमः
17. श्रीमते गौड-सदाशिव-इंद्रसरस्वत्यै नमः
18. श्रीमते सुर-इंद्रसरस्वत्यै नमः
19. श्रीमते मार्तंड-विद्याघन-इंद्रसरस्वत्यै नमः
20. श्रीमते मूकशंकर-इंद्रसरस्वत्यै नमः
21. श्रीमते जाह्नवी-चंद्रचूड-इंद्रसरस्वत्यै नमः
22. श्रीमते परिपूर्णबोध-इंद्रसरस्वत्यै नमः
23. श्रीमते सच्चित्सुख-इंद्रसरस्वत्यै नमः
24. श्रीमते कोंकण-चित्सुख-इंद्रसरस्वत्यै नमः
25. श्रीमते सच्चिदानंदघन-इंद्रसरस्वत्यै नमः
26. श्रीमते प्रज्ञाघन-इंद्रसरस्वत्यै नमः
27. श्रीमते चिद्विलास-इंद्रसरस्वत्यै नमः
28. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
29. श्रीमते पूर्णबोध-इंद्रसरस्वत्यै नमः
30. श्रीमते भक्तियोग-बोध-इंद्रसरस्वत्यै नमः
31. श्रीमते शीलनिधि-ब्रह्मानंदघन-इंद्रसरस्वत्यै नमः
32. श्रीमते चिदानंदघन-इंद्रसरस्वत्यै नमः
33. श्रीमते भाषापरमेष्ठि-सच्चिदानंदघन-इंद्रसरस्वत्यै नमः

34. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
35. श्रीमते बहुरूप-चित्सुख-इंद्रसरस्वत्यै नमः
36. श्रीमते चित्सुखानंद-इंद्रसरस्वत्यै नमः
37. श्रीमते विद्याघन-इंद्रसरस्वत्यै नमः
38. श्रीमते धीरशंकर-इंद्रसरस्वत्यै नमः
39. श्रीमते सच्चिद्विलास-इंद्रसरस्वत्यै नमः
40. श्रीमते शोभन-महादेव-इंद्रसरस्वत्यै नमः
41. श्रीमते गंगाधर-इंद्रसरस्वत्यै नमः
42. श्रीमते ब्रह्मानंदघन-इंद्रसरस्वत्यै नमः
43. श्रीमते आनंदघन-इंद्रसरस्वत्यै नमः
44. श्रीमते पूर्णबोध-इंद्रसरस्वत्यै नमः
45. श्रीमते परमशिव-इंद्रसरस्वत्यै नमः
46. श्रीमते सांद्रानंद-बोध-इंद्रसरस्वत्यै नमः
47. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
48. श्रीमते अद्वैतानंदबोध-इंद्रसरस्वत्यै नमः
49. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
50. श्रीमते चंद्रचूड-इंद्रसरस्वत्यै नमः
51. श्रीमते विद्यातीर्थ-इंद्रसरस्वत्यै नमः
52. श्रीमते शंकरानंद-इंद्रसरस्वत्यै नमः
    - श्रीमते अद्वैतब्रह्मानंदाय नमः
    - श्रीमते विद्यारण्याय नमः
    - अन्येभ्यः विद्यातीर्थ-शंकरानंद-शिष्येभ्यो नमः
53. श्रीमते पूर्णानंद-सदाशिव-इंद्रसरस्वत्यै नमः
54. श्रीमते व्यासाचल-महादेव-इंद्रसरस्वत्यै नमः
55. श्रीमते चंद्रचूड-इंद्रसरस्वत्यै नमः
56. श्रीमते सदाशिवबोध-इंद्रसरस्वत्यै नमः
57. श्रीमते परमशिव-इंद्रसरस्वत्यै नमः
    - श्रीमते सदाशिवब्रह्म-इंद्रसरस्वत्यै नमः
58. श्रीमते विश्वाधिक-आत्मबोध-इंद्रसरस्वत्यै नमः
59. श्रीमते भगवन्नाम-बोध-इंद्रसरस्वत्यै नमः

60. श्रीमते अद्वैतात्मप्रकाश-इंद्रसरस्वत्यै नमः
61. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
62. श्रीमते शिवगीतिमाला-चंद्रशेखर-इंद्रसरस्वत्यै नमः
63. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
64. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
65. श्रीमते सुदर्शन-महादेव-इंद्रसरस्वत्यै नमः
66. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
67. श्रीमते महादेव-इंद्रसरस्वत्यै नमः
68. श्रीमते चंद्रशेखर-इंद्रसरस्वत्यै नमः
69. श्रीमते जयेंद्रसरस्वत्यै नमः
70. श्रीमते शंकरविजयेंद्रसरस्वत्यै नमः
71. श्रीमते सत्य-चंद्रशेखरेंद्रसरस्वत्यै नमः

श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, नानाविध-परिमल-पत्र-पुष्पाणि समर्पयामि।

(विज्यम् ...)
संसार-सागरं घोरम् अनंत-क्लेश-भाजनम्।
त्वामेव शरणं प्राप्य निस्तरंति मनीषिणः॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, धूपम् आघ्रापयामि।

(या ते ...)
नमस्तस्मै भगवते शंकराचार्य-रूपिणे।
येन वेदांत-विद्येयम् उद्धृता वेद-सागरात्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, दीपं दर्शयामि।

(नमस्ते अस्त्वायुधाय ...)
भगवत्पाद-पादाब्ज-पांसवः संतु संततम्।
अपारासार-संसार-सागरोत्तार-सेतवः ॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, अमृतं महानैवेद्यं पानीयं च निवेदयामि।
निवेदनानंतरम् आचमनीयं समर्पयामि।

(परि ते ...)

श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, तांबूलं समर्पयामि।

(नमस्ते अस्तु भगवन् ...)
अज्ञान-तिमिरांधस्य ज्ञानांजन-शलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, नीराजनं दर्शयामि। नीराजनानंतरम् आचमनीयं समर्पयामि।
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, समस्तोपचारान् समर्पयामि।

यानि कानि च पापानि जन्मांतर-कृतानि च।
तानि तानि विनश्यंति प्रदक्षिण-पदे पदे॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, प्रदक्षिणं करोमि।

आचार्यान् भगवत्पादान् षण्मत-स्थापकान् हितान्।
परहंसान् नुमोऽद्वैत-स्थापकान् जगतो गुरून्॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, नमस्कारान् समर्पयामि।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
गुरुरेव परं ब्रह्म तस्मै श्री-गुरवे नमः॥

अखंड-मंडलाकारं व्याप्तं येन चराचरम्।
तत्-पदं दर्शितं येन तस्मै श्री-गुरवे नमः॥

अनेक-जन्म-संप्राप्त-कर्म-बंध-विदाहिने ।
आत्म-ज्ञान-प्रदानेन तस्मै श्री-गुरवे नमः॥

विशुद्ध-विज्ञान-घनं शुचिं हार्द-तमोनुदम्।
दया-सिंधुं लोक-बंधुं शंकरं नौमि सद्-गुरुम्॥

देह-बुद्ध्या तु दासोऽस्मि जीव-बुद्ध्या त्वदंशकः।
आत्म-बुद्ध्या त्वमेवाहमिति मे निश्चिता मतिः॥

एकः शाखी शंकराख्यश्चतुर्धा
स्थानं भेजे ताप-शांत्यै जनानाम्।
शिष्य-स्कंधैः शिष्य-शाखैर्महद्भिः
ज्ञानं पुष्पं यत्र मोक्षः प्रसूतिः॥

गामाक्रम्य पदेऽधिकांचि निबिडं स्कंधैश्चतुर्भिस्तथा
व्यावृण्वन् भुवनांतरं परिहरंस्तापं स-मोह-ज्वरम्।
यः शाखी द्विज-संस्तुतः फलति तत् स्वाद्यं रसाख्यं फलम्
तस्मै शंकर-पादपाय महते तन्मस्त्रि-संध्यं नमः॥
श्रीमत्-शंकर-भगवत्पादाचार्येभ्यो नमः, स्तोत्रं समर्पयामि।
प्रार्थनाः समर्पयामि।

गुरु-पादोदक-प्राशनम्—

अविद्या-मूल-नाशाय जन्म-कर्म-निवृत्तये।
ज्ञान-वैराग्य-सिद्ध्यर्थं गुरु-पादोदकं शुभम्॥

# ॥स्वस्ति-वचनम्॥

- स्वस्ति श्रीमद्-अखिल-भूमंडलालंकार-त्रयस्त्रिंशत्-कोटि-देवता-सेवित-श्री-कामाक्षी-देवी-सनाथ-श्रीमद्-एकाम्रनाथ-श्री-महादेवी-सनाथ-श्री-हस्तिगिरिनाथ-साक्षात्कार-परमाधिष्ठान-सत्यव्रत-नामांकित-कांची-दिव्य-क्षेत्रे शारदामठ-सुस्थितानाम्
- अतुलित-सुधा-रस-माधुर्य-कमलासन-कामिनी-धम्मिल्ल-संफुल्ल-मल्लिका-मालिका-निःष्यंद-मकरंद-झरी-सौवस्तिक-वाङ्गिगुंफ-विजृंभणानंद-तुंदिलित-मनीषि-मंडलानाम्
- अनवरताद्वैत-विद्या-विनोद-रसिकानां निरंतरालंकृती-कृत-शांति-दांति-भूम्नाम्
- सकल-भुवन-चक्र-प्रतिष्ठापक-श्रीचक्र-प्रतिष्ठा-विख्यात-यशोलंकृतानाम्
- निखिल-पाषंड-षंड-कंटकोत्पाटनेन विशदी-कृत-वेद-वेदांत-मार्ग-षण्मत-प्रतिष्ठापकाचार्याणाम्
- परमहंस-परिव्राजकाचार्य-वर्य-जगद्-गुरु-श्रीमत्-शंकर-भगवत्पादाचार्याणाम्
- अधिष्ठाने सिंहासनाभिषिक्त-श्रीमद्-जयेंद्र-सरस्वती-श्रीपादानाम्

- अंतेवासि-वर्य-श्रीमत्-शंकरविजयेंद्र-सरस्वती-श्रीपादानां
- तदंतेवासि-वर्य-श्रीमत्-सत्य-चंद्रशेखरेंद्र-सरस्वती-श्रीपादानां च
- चरण-नलिनयोः स-प्रश्रयं सांजलि-बंधं च नमस्कुर्मः॥

# ॥ तोटकाष्टकम् ॥

विदिताखिल-शास्त्र-सुधा-जलधे
महितोपनिषत्-कथितार्थ-निधे।
हृदये कलये विमलं चरणं
भव शंकर देशिक मे शरणम्॥ १॥

करुणा-वरुणालय पालय मां
भव-सागर-दुःख-विदून-हृदम्।
रचयाखिल-दर्शन-तत्त्व-विदं
भव शंकर देशिक मे शरणम्॥ २॥

भवता जनता सुहिता भविता
निज-बोध-विचारण-चारु-मते।
कलयेश्वर-जीव-विवेक-विदं
भव शंकर देशिक मे शरणम्॥ ३॥

भव एव भवानिति मे नितरां
समजायत चेतसि कौतुकिता।
मम वारय मोह-महा-जलधिं
भव शंकर देशिक मे शरणम्॥ ४॥

सुकृतेऽधिकृते बहुधा भवतो
भविता सम-दर्शन-लालसता।
अति-दीनमिमं परिपालय मां
भव शंकर देशिक मे शरणम्॥ ५॥

जगतीमवितुं कलिताकृतयो
विचरंति महा-महसश्छलतः।
अहिमांशुरिवात्र विभासि पुरो*
भव शंकर देशिक मे शरणम्॥ ६॥

गुरु-पुंगव पुंगव-केतन ते
समतामयतां न हि कोऽपि सुधीः।
शरणागत-वत्सल तत्त्व-निधे
भव शंकर देशिक मे शरणम्॥७॥

विदिता न मया विशदैक-कला
न च किंचन कांचनमस्ति गुरो।
द्रुतमेव विधेहि कृपां सहजां
भव शंकर देशिक मे शरणम्॥८॥

॥इति श्री-तोटकाचार्यविरचितं श्री-तोटकाष्टकं संपूर्णम्॥

[* गुरो इति पाठांतरम्]


जय जय शंकर हर हर शंकर
जय जय शंकर हर हर शंकर।
कांची-शंकर कामकोटि-शंकर
हर हर शंकर जय जय शंकर॥

कायेन वाचा मनसेंद्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद् यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

अनेन पूजनेन श्रीमत्-शंकर-भगवत्पादाचार्याः प्रीयंताम्।

ॐ तत् सद् ब्रह्मार्पणमस्तु।

## ॥श्रीशंकराचार्यवर्यम् - गीतम् - गणेशशास्त्रिणा विरचितम्॥



https://youtu.be/XAn1vD4lFv4

श्री-शंकराचार्य-वर्यम् –
चंद्रचूडावतारं भजे ज्ञान-मूर्तिम्॥ ० ॥
अद्वैत-सिद्धांत-मूलम् –
द्वैत-वादाख्य-मत्तेभ-पंचास्य-लीलम्।
भस्म-त्रिपुंड्रांग-फालम् –
सूत्र-भाष्यादि-निर्णीत-वेदांत-भावम्॥ १ ॥
नाना-विध-स्तोत्र-गीतैः –
सर्व-लोकोपकार-क्रियायां प्रवृत्तम्।
दुर्वादि-वादाभ्र-वातम् –
दूर-दूरास्त-कामादि-दुर्वैरि-बृंदम्॥ २ ॥
काषाय-संवीत-गात्रम् –
यौवन-श्री-समाश्लिष्ट-सर्वांगमीड्यम्।
कारुण्य-संपूर्ण-नेत्रम् –
मंद-हासोल्लसद्-वक्रमानंद-पात्रम्॥ ३ ॥
शिष्यैश्चतुर्भिः समेतम् –
वाम-हस्त-स्थ-वेदांत-सिद्धांत-कोशम्।
वीरासने सन्निषण्णम् –
दक्ष-हस्ताग्र-भागे लसज्ज्ञान-मुद्रम्॥ ४ ॥
संसार-दावाग्नि-तप्तम् –
ज्ञान-वृष्टि-प्रदानेन लोकं समस्तम्।
दुःख-त्रयान्मोचयंतम् –
नेत्र-निर्वाण-संदायि-रूपं यतींद्रम्॥ ५ ॥
गोविंद-योगींद्र-शिष्यम् –
शारदा-पीठ-निक्षिप्त-वागीश-दारम्।
साक्षात्कृत-ब्रह्म-तत्त्वम् –
षण्मत-स्थापकाचार्य-कीर्त्या लसंतम्॥ ६ ॥
तत्-तन्मठेषु स्व-शिष्यान् – स्थापयित्वा स्वयं कामकोट्याख्य-पीठे।
कांचीपुर-स्थेऽधिरुह्य –

सर्व-लोकोपदेश-क्रियायां प्रवृत्तम्॥ ७॥
इत्थं गणेशेन गीतम् –
स्तोत्रमेतत् पठेद् यः स्मरन् शंकरार्यम्।
नश्यंति पापानि तस्य –
ज्ञान-लाभः शुभानां भवेच्चापि वृद्धिः॥ ८॥

॥ इति नयतंत्रपदाभिज्ञेन शिरोमणिविरुदभूषितेन गणेशशास्त्रिणा विरचितं श्रीशंकराचार्यगीतं संपूर्णम्॥

# ॥ श्रीमच्चिद्विलासीय-शंकरविजयविलासे श्रीमत्-शंकर-भगवत्पाद-अवतार-घट्टः ॥




YouTube https://youtu.be/58KGBYZVUeM

## ॥ पंचमोऽध्यायः ॥


व्यराजत तदार्यांबा शिवैकायत्तचेतना ।
दृष्ट्वा शिवगुरुर्यज्वा भार्यामार्यां च गर्भिणीम् ॥ ३४ ॥
वृषाचलेशं सततं स्मरन्नेकाग्रचेतसा ।
दयालुतां स्तुवन् शंभोर्दीनेष्वपि महत्स्वपि ॥ ३५ ॥
ववृधे स पयोराशिः पूर्णेंदोरिव दर्शनात् ।
ततः सा दशमे मासि संपूर्णशुभलक्षणे ॥ ३६ ॥
दिवसे माधवर्तौ च स्वोच्चस्थे ग्रहपंचके ।
मध्याह्ने चाभिजिन्नाममुहूर्ते चार्द्रया युते ॥ ३७ ॥
उदयाचलवेलेव भानुमंतं महौजसम् ।
प्रासूत तनयं साध्वी गिरिजेव षडाननम् ॥ ३८ ॥
जयंतमिव पौलोमी व्यासं सत्यवती यथा ।
तदैवाग्रे निरीक्ष्येयमनुभूयेव वेदनाम् ॥ ३९ ॥
चतुर्भुजमुदारांगं त्रिणेत्रं चंद्रशेखरम् ।
दुर्निरीक्ष्यैः स्वतेजोभिर्भासयंतं दिशो दश ॥ ४० ॥
दिवाकरकराकारैर्गौरैरीषद्विलोहितैः ।
एवमाकारमालोक्य विस्मिता विह्वला भिया ॥ ४१ ॥
किं किं किमिदमाश्चर्यमन्यदेव मदीप्सितम् ।
परं त्वन्यत् समुद्भूतमिति चिंताभृति स्वयम् ॥ ४२ ॥
उद्वीक्षंत्यां प्रणमितुं तस्यां कुतुकतायुजि ।

ससृजुः पुष्पवर्षाणि देवा भुव्यंतरिक्षगाः ॥ ४३ ॥
कह्लारकलिकागंधबंधुरो मरुदाववौ ।
दिशः प्रकाशिताकाशाः सा धरा सादरा बभौ ॥ ४४ ॥
प्रायः प्रदक्षिणज्वाला जज्वलुर्यज्ञपावकाः ।
प्रसन्नमभवच्चित्तं सतां प्रतपतामपि ॥ ४५ ॥
इत्थमन्यद्विलोक्यापि प्रश्रिता विनयान्विता ।
वृषाचलेशं निश्चित्य प्रादुर्भूतमतंद्रिता ॥ ४६ ॥
स्वामिन् दर्शय मे लीला बालभावक्रमोचिताः ।
इत्थं सा प्रार्थयामास साध्वी भूयो महेश्वरम् ॥ ४७ ॥
ततः किशोरवत्सोऽपि किंचिद्विचलिताधरः।
ताडयन् चरणौ हस्तौ रुरोदैव क्षणादसौ ॥ ४८ ॥
आर्या साऽपि तदैवासीन्मायामोहितमानसा।
जगन्मोहकरी माया महेशितुरनीदृशी ॥ ४९ ॥
तत्रत्यास्तु जना नार्यो नाविंदन् वृत्तमीदृशम् ।
बालकं मेनिरे प्रोद्यदिंदुबिंबमिवोज्ज्वलम् ॥ ५० ॥
तत्रत्या वृद्धनार्योऽपि यथोचितमथाचरन् ।
ततः श्रुत्वा पिता सोऽपि निधिं प्राप्येव निर्धनः ॥ ५१ ॥
मुमुदे नितरां चित्ते वित्तेशं नाभ्यलक्षत ।
आविर्भावं तु जानाति शंभोर्नाबोधयच्च सा ॥ ५२ ॥
स्नात्वा शिवगुरुर्यज्वा यज्वनामग्रणीस्ततः ।
विप्रानाकारयामास पुरंध्रीरपि सर्वतः ॥ ५३ ॥
तदोत्सवो महानासीत् पुरे सद्मनि संततम् ।
धान्यराशिं मखिभ्योऽसौ विज्ञो भूयः प्रदत्तवान् ॥ ५४ ॥
धनानि भूरि विप्रेभ्यो वेदविज्ञो दिदेश सः ।
वासांसि भूयो दिव्यानि सफलानि प्रदत्तवान् ॥ ५५ ॥
पुरंध्रीणां च नीरंध्रं वस्तुजातान्यदादसौ ।
घटोघ्नीर्बहुशो गाश्च सालंकाराः सदक्षिणाः ॥ ५६ ॥
वृषाचलेशः सततं प्रीयतामित्यसौ ददौ ।

ततः शिवगुरुर्यज्वा ब्राह्मणान् पूर्वतोऽधिकम् ॥ ५७ ॥
संतर्प्य बंधुभिः सार्धं मुदितो न्यवसत् सुधीः ।
बालभावे विशालाक्षमतिविस्तृतवक्षसम् ॥ ५८ ॥
आजानुलंबितभुजं सुविशालनिटालकम् ।
आरक्तोपांतनयनविनिंदितसरोरुहम् ॥ ५९ ॥
मुखकांतिपराभूतराकाहिमकराकृतिम् ।
भासा गौर्या प्रसृतया प्रोद्यंतमिव भास्करम् ॥ ६० ॥
शंखचक्रध्वजाकाररेखाचिह्नपदांबुजम् ।
द्वात्रिंशल्लक्षणोपेतं विद्युदाभकलेवरम् ॥ ६१ ॥
प्रमोदं दृष्टमात्रेण दिशंतं तं स्तनंधयम् ।
पायंपायं दृशा प्रेम्णा श्रीकृष्णमिव गोपिका ॥ ६२ ॥
प्रपेदे न क्षणं तृप्तिं चकोरीव सुधाकरम् ।
तादृशं बालकं दृष्ट्वा त्वार्यांबा शुभलक्षणम् ।
तिष्ठति स्म सुखेनैव लालयंती तनूभवम् ॥ ६३ ॥
॥ इति श्रीचिद्विलासीयश्रीशंकरविजयविलासे श्रीशंकरभगवत्पादाचार्याणाम् अवतारघट्टः संपूर्णः ॥

❁

# ॥ कांच्यां सर्वज्ञपीठारोहण-घट्टः ॥




You Tube https://youtu.be/Qe8BT0elhXM

## ॥ पंचविंशोऽध्यायः ॥

श्रीचक्रपश्चाद्भागे तु कामाक्षीं ज्ञानरूपिणीम् ॥ ४४ ॥
प्रतिष्ठाप्य च पूजायै ब्राह्मणान् विनियुज्य च ।
एकाम्रेश्वरपूजार्थं विप्रानादिश्य भूयसः ॥ ४५ ॥
श्रीमद्वरदराजस्य नमस्यायै नियुज्य च ।
सर्वज्ञपीठमारोढुमुत्सेहे देशिकोत्तमः ॥ ४६ ॥
ततोऽशरीरिणी वाणी नभोमार्गाद् व्यजृंभत ।
भो यतिन् भवता सर्वविद्यास्वपि विशेषतः ॥ ४७ ॥
कृत्वा प्रसंगं विद्वद्भिः जित्वा तान् अखिलानपि ।
सर्वज्ञपीठमारोढुम् उचितं ननु भूतले ॥ ४८ ॥
इति वाचं समाकर्ण्य किमेतदिति विस्मितः ।
किंचिदालोचयन्नास्त किं करोमीति मानसे ॥ ४९ ॥
ताम्रपर्णीसरित्तीरवासिनो विबुधास्तदा ।
षड्दर्शिनीसुधावार्धिपारदृश्वगुणोन्नताः ॥ ५० ॥
आगत्य तं देशिकेंद्रं प्रणिपत्येदमूचिरे ।
भिदा सत्यमिवाभाति त्वया त्वैक्यं निगद्यते ॥ ५१ ॥
देवभेदो मूर्तिभेदः प्रत्यक्षेणात्र लक्ष्यते ।
स्वर्गादिफलभेदश्च सर्वशास्त्रविनिश्चितः ॥ ५२ ॥
तत्प्रत्यक्षं च मिथ्येति कथयस्यधुना यते ।
इति ब्रुवत्सु विद्वत्सु शंकराचार्यदेशिकः ॥ ५३ ॥
श्रृणुतात्रोत्तरं विप्राः ब्रह्मैकं तु सनातनम् ।

इंद्रोपेंद्रधनेंद्राद्यास्तद्विभूतय एव हि ॥ ५४ ॥
मृदि कुंभो यथा भाति कनके कंकणं यथा ।
जले वीचिर्यथा भाति तथेदं च विभाव्यते ॥ ५५ ॥
यां देवतां भजंते ये तत्सारूप्यं प्रयांति ते ।
ये वा पुण्यं चरंतीह ते स्वर्गे फलभोगिनः ॥ ५६ ॥
एको देव इति श्रुत्या जगत् सर्वं तदाकृतिः ।
तद्भिन्नमन्यन्नास्त्येव वेदांतैकविनिश्चितम् ॥ ५७ ॥
तस्मादखंडमात्मानमद्वयानंदलक्षणम् ।
ज्ञात्वा गुरुप्रसादेन मुक्ता भवत नान्यथा ॥ ५८ ॥
श्रुतिस्मृतिपुराणोक्तैः वचनैरिति देशिकः ।
भेदवादरतान् विप्रान् आधायाद्वैतपारगान् ॥ ५९ ॥
ततस्ततो विप्रश्चिद्भिः प्रणतश्चातिभक्तितः ।
गीतवादित्रनिर्घोषैः जयवादसमुज्ज्वलैः ॥ ६० ॥
आरुरोहाथ सर्वज्ञपीठं देशिकपुंगवः ।
पुष्पवृष्टिः पपाताथ ववुर्वाताः सुगंधयः ॥ ६१ ॥
॥ इति श्रीचिद्विलासीयश्रीशंकरविजयविलासे श्रीशंकरभगवत्पादाचार्याणां कांच्यां सर्वज्ञपीठारोहणघट्टः संपूर्णः ॥

# ॥ श्री-भगवत्पाद्-कीर्तन-नामावलिः ॥

The namavali-s before may be used in occasions such as Shri Bhagavatpada being taken as yatra in the village/area. Only the first paragraph below is continuously in our tradition. Devotees may adapt the content after that as appropriate. Only some examples are given. The first paragraph may be said again and again in the middle like a pallavi.

**जय जय शंकर हर हर शंकर ।**
**कांची-शंकर कामकोटि-शंकर ।**

आदि-शंकर अद्वैत-शंकर ।
कालडि-शंकर कामाक्षि-शंकर ।

[जय जय … कामकोटि-शंकर ।]

आचार्य शंकर अद्भुत शंकर ।
अखंड शंकर आनंद-शंकर ।

[जय जय … कामकोटि-शंकर ।]

उन्नत शंकर चिन्मय शंकर ।
अघहर शंकर सुखकर शंकर ।

[जय जय … कामकोटि-शंकर ।]

नररूप शंकर नतपाल शंकर ।
ज्ञानद् शंकर मोक्षद् शंकर ।

[जय जय … कामकोटि-शंकर ।]

भाष्यद् शंकर भारत-शंकर ।


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

भुक्तिद शंकर मुक्तिद शंकर ।

[जय जय … कामकोटि-शंकर ।]

भावुक शंकर भक्त-वशंकर ।
शिवकर शंकर शीतल शंकर ।

[जय जय … कामकोटि-शंकर ।]

विद्वन् शंकर विवेक-शंकर ।
योगींद्र शंकर यतींद्र शंकर ।

[जय जय … कामकोटि-शंकर ।]

साधो शंकर सज्जन-शंकर ।
सद्गुरु-शंकर सर्वज्ञ शंकर ।

[जय जय … कामकोटि-शंकर ।]

❁